# Raghuvansha by Kalidas Chapter 10

# રઘુવંશં સર્ગઃ ૧૦ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha 10

File name : raghuvansha10.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : May 30, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૦ કાલિદાસકૃતમ્

પૃથિવીં શાસતસ્તસ્ય પાકશાસનતેજસઃ ।
કિંચિદૂનમનૂનર્દ્ધેઃ શરદામયુતં યયૌ ॥ ૧૦-૧ ॥

ન ચોપલેભે પૂર્વેષામૃણનિર્મોક્ષસાધનમ્ ।
સુતાભિધાનં સ જ્યોતિઃ સદ્યઃ શોકતમોપહમ્ ॥ ૧૦-૨ ॥

અતિષ્ઠત્પ્રત્યયાપેક્ષસંતતિઃ સ ચિરં નૃપઃ ।
પ્રાઙ્મન્થાદનભિવ્યક્તરત્નોત્પત્તિરિવાર્ણવઃ ॥ ૧૦-૩ ॥

ઋષ્યશ‍ૃઙ્ગાદયસ્તસ્ય સન્તઃ સન્તાનકાઙ્ક્ષિણઃ ।
આરેભિરે જિતાત્માનઃ પુત્રીયામિષ્ટિમૃત્વિજઃ ॥ ૧૦-૪ ॥

તસ્મિન્નવસરે દેવાઃ પૌલસ્ત્યોપપ્લુતા હરિમ્ ।
અભિજગ્મુર્નિદાઘાર્તાશ્છાયાવૃક્ષમિવાધ્વગાઃ ॥ ૧૦-૫ ॥

તે ચ પ્રાપુરુદન્વન્તં બુબુધે ચાદિપૂરુષઃ ।
અવ્યાક્ષેપો ભવિષ્યન્ત્યાઃ કાર્યસિદ્ધેર્હિ લક્ષણમ્ ॥ ૧૦-૬ ॥

ભોગિભોગાસનાસીનં દદૃશુસ્તં દિવૌકસઃ ।
તત્ફણામણ્ડલોદર્ચિર્મણિદ્યોતિતવિગ્રહમ્ ॥ ૧૦-૭ ॥

શ્રિયઃ પદ્મનિષણ્ણાયાઃ ક્ષૌમાન્તરિતમેખલે ।
અઙ્કે નિક્ષિપ્તચરણમાસ્તીર્ણકરપલ્લવે ॥ ૧૦-૮ ॥

પ્રબુદ્ધપુણ્ડરીકાક્ષં બાલાતપનિભાંશુકમ્ ।
દિવસં શારદમિવ પ્રારમ્ભસુખદર્શનમ્ ॥ ૧૦-૯ ॥

પ્રભાનુલિપ્તશ્રીવત્સં લક્ષ્મીવિભ્રમદર્પણમ્ ।
કૌસ્તુભાખ્યમપાં સારં બિભ્રાણં બૃહતોરસા ॥ ૧૦-૧૦ ॥

બહુભિર્વિટપાકારૈર્દિવ્યાભરણભૂષિતૈઃ ।
આવિર્ભૂતમપાં મધ્યે પારિજાતમિવાપરમ્ ॥ ૧૦-૧૧ ॥

દૈત્યસ્ત્રીગણ્ડલેખાનાં મદરાગવિલોપિભિઃ ।
હેતિભિશ્ચેતનાવદ્ભિરુદીરિતજયસ્વનમ્ ॥ ૧૦-૧૨ ॥

મુક્તશેષવિરોધેન કુલિશવ્રણલક્ષ્મણા ।
ઉપસ્થિતં પ્રાઞ્જલિના વિનીતેન ગરુત્મતા ॥ ૧૦-૧૩ ॥

યોગનિદ્રાન્તવિશદૈઃ પાવનૈરવલોકનૈઃ ।
ભૃગ્વાદીનનુગૃહ્ણન્તં સૌખશાયનિકાનૃષીન્ ॥ ૧૦-૧૪ ॥

પ્રણિપત્ય સુરાસ્તસ્મૈ શમયિત્રે સુરદ્વિષાં ।
અથૈનં તુષ્ટુવુઃ સ્તુત્યમવાઙ્મનસગોચરમ્ ॥ ૧૦-૧૫ ॥

નમો વિશ્વસૃજે પૂર્વં વિશ્વં તદનુ બિભ્રતે ।
અથ વિશ્વસ્ય સંહર્ત્રે તુભ્યં ત્રેધાસ્થિતાત્મને ॥ ૧૦-૧૬ ॥

રસાન્તરાણ્યેકરસં યથા દિવ્યં પયોઽશ્નુતે ।
દેશે દેશે ગુણેષ્વેવમવસ્થાસ્તવમવિક્રિયઃ ॥ ૧૦-૧૭ ॥

અમેયો મિતલોકસ્ત્વમનર્થી પ્રાર્થનાવહઃ ।
અજિતો જિષ્ણુરત્યન્તમવ્યક્તો વ્યક્તકારણમ્ ॥ ૧૦-૧૮ ॥

હૃદયસ્થમનાસન્નમકામં ત્વાં તપસ્વિનમ્ ।
દયાલુમનઘસ્પૃષ્ટં પુરાણમજરં વિદુઃ ॥ ૧૦-૧૯ ॥

સર્વજ્ઞસ્ત્વમવિજ્ઞાતઃ સર્વયોનિસ્ત્વમાત્મભૂઃ ।
સર્વપ્રભુરનીશસ્ત્વમેકસ્ત્વં સર્વરૂપભાક્ ॥ ૧૦-૨૦ ॥

સપ્તસામોપગીતં ત્વાં સપ્તાર્ણવજલેશયમ્ ।
સપ્તાર્ચિમુખમાચખ્યુઃ સપ્તલોકૈકસંશ્રયમ્ ॥ ૧૦-૨૧ ॥

ચતુર્વર્ગફલં જ્ઞાનં કાલાવસ્થાશ્ચતુર્યુગાઃ ।
ચતુર્વર્ણમયો લોકસ્ત્વત્તઃ સર્વં ચતુર્મુખાત્ ॥ ૧૦-૨૨ ॥

અભ્યાસનિગૃહીતેન મનસા હૃદયાશ્રયમ્ ।
જ્યોતિર્મયં વિચિન્વન્તિ યોગિનસ્ત્વાં વિમુક્તયે ॥ ૧૦-૨૩ ॥

અજસ્ય ગૃહ્ણતો જન્મ નિરીહસ્ય હતદ્વિષઃ ।
સ્વપતો જાગરૂકસ્ય યાથાર્થ્યં વેદ કસ્તવ ॥ ૧૦-૨૪ ॥

શબ્દાદીન્વિષયાન્ભોક્તું ચરિતું દુશ્ચરં તપઃ ।
પર્યાપ્તોઽસિ પ્રજાઃ પાતુમૌદાસીન્યેન વર્તિતુમ્ ॥ ૧૦-૨૫ ॥

બહુધાપ્યાગમૈર્ભિન્નાઃ પન્થાનઃ સિદ્ધિહેતવઃ ।
ત્વય્યેવ નિપતન્ત્યોઘા જાહ્નવીયા ઇવાર્ણવે ॥ ૧૦-૨૬ ॥

ત્વય્યાવેશિતચિત્તાનાં ત્વત્સમર્પિતકર્મણામ્ ।
ગતિસ્ત્વં વીતરાગાણામભૂયઃસંનિવૃત્તયે ॥ ૧૦-૨૭ ॥

પ્રત્યક્ષોઽપ્યપરિચ્છેદ્યો મહ્યાદિર્મહિમા તવ ।
આપ્તવાગનુમાનાભ્યાં સાધ્યં ત્વાં પ્રતિ કા કથા ॥ ૧૦-૨૮ ॥

કેવલં સ્મરણેનૈવ પુનાંસિ પુરુષં યતઃ ।
અનેન વૃત્તયઃ શેષા નિવેદિતફલાસ્ત્વયિ ॥ ૧૦-૨૯ ॥

ઉદધેરિવ રત્નાનિ તેજાંસીવ વિવસ્વતઃ ।
સ્તુતિભ્યો વ્યતિરિચ્યન્તે દૂરાણિ ચરિતાનિ તે ॥ ૧૦-૩૦ ॥

અનવાપ્તમવાપ્તવ્યં ન તે કિઞ્ચન વિદ્યતે ।
લોકાનુગ્રહ એવૈકો હેતુસ્તે જન્મકર્મણોઃ ॥ ૧૦-૩૧ ॥

મહિમાનં યદુત્કીર્ત્ય તવ સંહ્રિયતે વચઃ ।
શ્રમેણ તદશક્ત્યા વા ન ગુણાનામિયત્તયા ॥ ૧૦-૩૨ ॥

ઇતિ પ્રસાદયામાસુસ્તે સુરાસ્તમધોક્ષજમ્ ।
ભૂતાર્થવ્યાહૃતિઃ સા હિ ન સ્તુતિઃ પરમેષ્ઠિનઃ ॥ ૧૦-૩૩ ॥

તસ્મૈ કુશલસંપ્રશ્નવ્યઞ્જિતપ્રીતયે સુરાઃ ।
ભયમપ્રલયોદ્વેલાદાચખ્યુર્નૈરૃતોદધેઃ ॥ ૧૦-૩૪ ॥

અથ વેલાસમાસન્નશૈલરન્ધ્રાનુવાદિના ।
સ્વરેણોવાચ ભગવાન્ પરિભૂતાર્ણવધ્વનિઃ ॥ ૧૦-૩૫ ॥

પુરાણસ્ય કવેસ્તસ્ય વર્ણસ્થાનસમીરિતા ।
બભૂવ કૃતસંસ્કારા ચરિતાર્થૈવ ભારતી ॥ ૧૦-૩૬ ॥

બભૌ સદશનજ્યોત્સ્ના સા વિભોર્વદનોદ્ગતા ।
નિર્યાતશેષા ચરણાદ્ગઙ્ગેવોર્ધ્વપ્રવર્તિની ॥ ૧૦-૩૭ ॥

જાને વો રક્ષસાક્રાન્તાવનુભાવપરાક્રમૌ ।
અઙ્ગિનાં તમસેવોભૌ ગુણૌ પ્રથમમધ્યમૌ ॥ ૧૦-૩૮ ॥

વિદિતં તપ્યમાનં ચ તેન મે ભુવનત્રયમ્ ।

અકામોપનતેનેવ સાધોર્હૃદયમેનસા ॥ ૧૦-૩૯ ॥

કાર્યેષુ ચૈકકાર્યત્વાદભ્યર્થ્યોઽસ્મિ ન વજ્રિણા ।
સ્વયમેવ હિ વાતોઽગ્નેઃ સારથ્યં પ્રતિપદ્યતે ॥ ૧૦-૪૦ ॥

સ્વાસિધારાપરિહૃતઃ કામં ચક્રસ્ય તેન મે ।
સ્થાપિતો દશમો મૂર્ધા લભ્યાંશ ઇવ રક્ષસા ॥ ૧૦-૪૧ ॥

સ્રષ્ટુર્વરાતિસર્ગાત્તુ મયા તસ્ય દુરાત્મનઃ ।
અત્યારૂઢં રિપોઃ સોઢં ચન્દનેનેવ ભોગિનઃ ॥ ૧૦-૪૨ ॥

ધાતારં તપસા પ્રીતં યયાચે સ હિ રાક્ષસઃ ।
દૈવાત્સર્ગાદવધ્યત્વં મર્ત્યેષ્વાસ્થાપરાઙ્મુખઃ ॥ ૧૦-૪૩ ॥

સોઽહં દાશરથિર્ભૂત્વા રણભૂમેર્બલિક્ષમમ્ ।
કરિષ્યામિ શરૈસ્તીક્ષ્ણૈસ્તચ્છિરઃકમલોચ્ચયમ્ ॥ ૧૦-૪૪ ॥

અચિરાદ્યજ્વભિર્ભાગં કલ્પિતં વિધિવત્પુનઃ ।
માયાવિભિરનાલીઢમાદાસ્યધ્વે નિશાચરૈઃ ॥ ૧૦-૪૫ ॥

વૈમાનિકાઃ પુણ્યકૃતસ્ત્યજન્તુ મરુતાં પથિ ।
પુષ્પકાલોકસંક્ષોભં મેઘાવરણતત્પરાઃ ॥ ૧૦-૪૬ ॥

મોક્ષ્યધ્વે સ્વર્ગબન્દીનાં વેણીબન્ધનદૂષિતાન્ ।
શાપયન્ત્રિતપૌલસ્ત્યબલાત્કારકચગ્રહૈઃ ॥ ૧૦-૪૭ ॥

રાવણાવગ્રહક્લાન્તમિતિ વાગમૃતેન સઃ ।
અભિવૃષ્ય મરુત્સસ્યં કૃષ્ણમેઘસ્તિરોદધે ॥ ૧૦-૪૮ ॥

પુરહૂતપ્રભૃતયઃ સુરકાર્યોદ્યતં સુરાઃ ।
અંશૈરનુયયુર્વિષ્ણું પુષ્પૈર્વાયુમિવ દ્રુમાઃ ॥ ૧૦-૪૯ ॥

અથ તસ્ય વિશાંપત્યુરન્તે કામસ્ય કર્મણઃ ।
પુરુષઃ પ્રબભૂવાગ્નેર્વિસ્મયેન સહર્ત્વિજામ્ ॥ ૧૦-૫૦ ॥

હેમપાત્રગતં દોર્ભ્યામાદધાનઃ પયશ્ચરુમ્ ।
અનુપ્રવેશાદાદ્યસ્ય પુંસસ્તેનાપિ દુર્વહમ્ ॥ ૧૦-૫૧ ॥

પ્રાજાપત્યોપનીતં તદન્નં પ્રત્યગ્રહીન્નૃપઃ ।
વૃષેવ પયસાં સારમાવિષ્કૃતમુદન્વતા ॥ ૧૦-૫૨ ॥

અનેન કથિતા રાજ્ઞો ગુણાસ્તસ્યાન્યદુર્લભાઃ ।
પ્રસૂતિં ચકમે તસ્મિંસ્ત્રૈલોક્યપ્રભવોऽપિ યત્ ॥ ૧૦-૫૩ ॥

સ તેજો વૈષ્ણવં પત્ન્યોર્વિભેજે ચરુસંજ્ઞિતમ્ ।
દ્યાવાપૃથિવ્યોઃ પ્રત્યગ્રમહર્પતિરિવાતપમ્ ॥ ૧૦-૫૪ ॥

અર્ચિતા તસ્ય કૌસલ્યા પ્રિયા કેકયવંશજા ।
અતઃ સંભાવિતાં તાભ્યાં સુમિત્રામૈચ્છદીશ્વરઃ ॥ ૧૦-૫૫ ॥

તે બહુજ્ઞસ્ય ચિત્તજ્ઞે પત્નૌ પત્યુર્મહીક્ષિતઃ ।
ચરોરર્ધાર્ધભાગાભ્યાં તામયોજયતામુભે ॥ ૧૦-૫૬ ॥

સા હિ પ્રણયવત્યાસીત્સપત્ન્યોરુભયોરપિ ।
ભ્રમરી વારણસ્યેવ મદનિસ્યન્દરેખયોઃ ॥ ૧૦-૫૭ ॥

તાભિર્ગર્ભઃ પ્રજાભૂત્યૈ દધ્રે દેવાંશસંભવઃ ।
સૌરીભિરિવ નાડીભિરમૃતાખ્યાભિરમ્મયઃ ॥ ૧૦-૫૮ ॥

સમમાપન્નસત્ત્વાસ્તા રેજુરાપાણ્ડુરત્વિષઃ ।
અન્તર્ગતફલારમ્ભાઃ સસ્યાનામિવ સંપદઃ ॥ ૧૦-૫૯ ॥

ગુપ્તં દદૃશુરાત્માનં સર્વાઃ સ્વપ્નેષુ વામનૈઃ ।
જલજાસિકદાશાર્ઙ્ગચક્રલાઞ્છિતમૂર્તિભિઃ ॥ ૧૦-૬૦ ॥

હેમપક્ષપ્રભાજાલં ગગને ચ વિતન્વતા ।
ઉહ્યન્તે સ્મ સુપર્ણેન વેગાકૃષ્ટપયોમુચા ॥ ૧૦-૬૧ ॥

બિભ્રત્યા કૌસ્તુભન્યાસં સ્તનાન્તરવિલમ્બિતમ્ ।
પર્યુપાસ્યન્ત લક્ષ્મ્યા ચ પદ્મવ્યજનહસ્તયા ॥ ૧૦-૬૨ ॥

કૃતાભિષેકૈર્દિવ્યાયાં ત્રિસ્રોતસિ ચ સપ્તભિઃ ।
બ્રહ્મર્ષિભિઃ પરં બ્રહ્મ ગૃણદ્ભિરુપતસ્થિરે ॥ ૧૦-૬૩ ॥

તાભ્યસ્તથાવિધાન્સ્વપ્નાઞ્છ્રુત્વા પ્રીતો હિ પાર્થિવઃ ।
મેને પરાર્ધ્યમાત્માનં ગુરુત્વેન જગદ્ગુરોઃ ॥ ૧૦-૬૪ ॥

વિભક્તાત્મા વિભુસ્તાસામેકઃ કુક્ષિષ્વનેકધા ।
ઉવાસ પ્રતિમાચન્દ્રઃ પ્રસન્નાનામપામિવ ॥ ૧૦-૬૫ ॥

અથાગ્ર્યમહિષી રાજ્ઞઃ પ્રસૂતિસમયે સતી ।
પુત્રં તમોપહં લેભે નક્તં જ્યોતિરિવૌષધિઃ ॥ ૧૦-૬૬ ॥

રામ ઇત્યભિરામેણ વપુષા તસ્ય ચોદિતઃ ।
નામધેયં ગુરુશ્ચક્રે જગત્પ્રથમમઙ્ગલમ્ ॥ ૧૦-૬૭ ॥

રઘુવંશપ્રદીપેન તેનાપ્રતિમતેજસા ।
રક્ષાગૃહગતા દીપાઃ પ્રત્યાદિષ્ટા ઇવાભવન્ ॥ ૧૦-૬૮ ॥

શય્યાગતેન રામેણ માતા શાતોદરી બભૌ ।
સૈકતામ્ભોજબલિના જાહ્નવીવ શરત્કૃશા ॥ ૧૦-૬૯ ॥

કૈકેય્યાસ્તનયો જજ્ઞે ભરતો નામ શીલવાન્ ।
જનયિત્રીમલંચક્રે યઃ પ્રશ્રય ઇવ શ્રિયમ્ ॥ ૧૦-૭૦ ॥

સુતૌ લક્ષ્મણશત્રુઘ્નૌ સુમિત્રા સુષુવે યમૌ ।
સમ્યગારાધિતા વિદ્યા પ્રબોધવિનયાવિવ ॥ ૧૦-૭૧ ॥

નિર્દોષમભવત્સર્વમાવિષ્કૃતગુણં જગત્ ।
અન્વગાદિવ હિ સ્વર્ગો ગાં ગતં પુરુષોત્તમમ્ ॥ ૧૦-૭૨ ॥

તસ્યોદયે ચતુર્મૂર્તેઃ પૌલસ્ત્યચકિતેશ્વરાઃ ।
વિરજસ્કૈર્નભસ્વદ્ભિર્દિશ ઉચ્છ્વસિતા ઇવ ॥ ૧૦-૭૩ ॥

કૃશાનુરપધૂમત્વાત્પ્રસન્નત્વાત્પ્રભાકરઃ ।
રક્ષોવિપ્રકૃતાવાસ્તામપવિદ્ધશુચાવિવ ॥ ૧૦-૭૪ ॥

દશાનનકિરીટેભ્યસ્તત્ક્ષણં રાક્ષસશ્રિયઃ ।
મણિવ્યાજેન પર્યસ્તાઃ પૃથિવ્યામશ્રુબિન્દવઃ ॥ ૧૦-૭૫ ॥

પુત્રજન્મપ્રવેશ્યાનાં તૂર્યાણાં તસ્ય પુત્રિણઃ ।
આરમ્ભં પ્રથમં ચક્રુર્દેવદુન્દુભયો દિવિ ॥ ૧૦-૭૬ ॥

સંતાનકમયી વૃષ્ટિર્ભવને ચાસ્ય પેતુષી ।
સન્મઙ્ગલોપચારાણાં સૈવાદિરચનાઽભવત્ ॥ ૧૦-૭૭ ॥

કુમારાઃ કૃતસંસ્કારાસ્તે ધાત્રીસ્તન્યપાયિનઃ ।
આનન્દેનાગ્રજેનેવ સમં વવૃધિરે પિતુઃ ॥ ૧૦-૭૮ ॥

સ્વાભાવિકં વિનીતત્વં તેષાં વિનયકર્મણા ।
મુમૂર્ચ્છ સહજં તેજો હવિષેવ હવિર્ભુજામ્ ॥ ૧૦-૭૯ ॥

પરસ્પરવિરુદ્ધાસ્તે તદ્રઘોરનઘં કુલમ્ ।

અલમુદ્યોતયામાસુર્દેવારણ્યમિવર્તવઃ
સમાનેઽપિ હિ સૌભ્રાત્રે યથેભૌ રામલક્ષ્મણૌ ।
તથા ભરતશત્રુઘ્નૌ પ્રીત્યા દ્વન્દ્વં બભૂવતુઃ ॥ ૧૦-૮૧ ॥

તેષાં દ્વયોર્દ્વયોરૈક્યં બિભિદે ન કદાચન ।
યથા વાયુર્વિભાવસ્વોર્યથા ચન્દ્રસમુદ્રયોઃ ॥ ૧૦-૮૨ ॥

તે પ્રજાનાં પ્રજાનાથાસ્તેજસા પ્રશ્રયેણ ચ ।
મનો જહ્રુર્નિદાઘાન્તે શ્યામાભ્રા દિવસા ઇવ ॥ ૧૦-૮૩ ॥

સ ચતુર્ધા બભૌ વ્યસ્તઃ પ્રસવઃ પૃથિવીપતેઃ ।
ધર્માર્થકામમોક્ષાણામવતાર ઇવાઙ્ગવાન્ ॥ ૧૦-૮૪ ॥

ગુણૈરારાધયામાસુસ્તે ગુરું ગુરુવત્સલાઃ ।
તમેવ ચતુરન્તેશં રત્નૈરિવ મહાર્ણવાઃ ॥ ૧૦-૮૫ ॥

સુરગજ ઇવ દન્તૈર્ભગ્નદૈત્યાસિધારૈ-
ર્નય ઇવ પણબન્ધવ્યક્તયોગૈરુપાયૈઃ ।
હરિરિવ યુગદીર્ઘૈર્દોર્ભિરંશૈસ્તદીયૈઃ
પતિરવનિપતીનાં તૈશ્ચકાશે ચતુર્ભિઃ ॥ ૧૦-૮૬ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
રામાવતારૂ નામ દશમઃ સર્ગઃ ॥

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha by Kalidas Chapter 10*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*